वियोज्य / *DETACHABLE*

# SANSKRIT
## Paper II
## (LITERATURE)

*Time Allowed : Three Hours*

*Maximum Marks : 250*

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

There are EIGHT questions divided into two SECTIONS.

Candidate has to attempt FIVE questions in all.

Question No. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE from each section.

The number of marks carried by a question/part is indicated against it.

Question No. 4, 5 and 6 must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission certificate. Answers written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## SECTION 'A'

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं विधीयताम् । 10×5=50

**1.(a)** रघुवंशे कालिदासेनाविष्कृतं जीवनदर्शनम् ।

**1.(b)** किरातार्जुनीये वीररसः ।

**1.(c)** नैषधीयचरिते श्रीहर्षकवेः दर्शनशास्त्रवैदुष्यम् ।

**1.(d)** कादम्बरीरसज्ञानामाहारोऽपि न रोचते ।

**1.(e)** दशकुमारचरिते तात्कालिकस्य समाजस्य ज्वलन्तचित्रणम् ।

**2.** अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया । 17+17+16=50

**2.(a)** ईशावास्योपनिषदि ज्ञान-कर्मसमन्वयः ।

**2.(b)** भगवद्गीतायां प्रतिपादितं आत्म-प्रबन्धनम् ।

**2.(c)** चतस्र एव विद्या इति कौटिल्यः ।

3. अधस्तनयोः विषययोः सारपरिपूर्णा समीक्षा कार्या । 25×2=50

3.(a) कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् ।

3.(b) शास्त्रीयपद्धतिमाश्रित्य विरचितेषु दृश्यकाव्येषु 'रत्नावली'नाम दृश्यकाव्यमेकं श्रेष्ठं दृश्यकाव्यम् ।

4. अधस्तनेषु विषयेषु नागराक्षरैः संस्कृतभाषायामेव विवेचनं विधेयम् । 17+17+16=50

4.(a) मेघदूतं प्रकृतेरनुपमा रङ्गशालेव भाति ।

4.(b) हर्षचरितं सप्तशतकवर्तिनो भारतस्य अत्युज्ज्वलं प्रामाणिकं सांस्कृतिकं चित्रं प्रस्तौति ।

4.(c) गीतगोविन्दस्य रचनाकौशलम् ।

## SECTION 'B'

5. नागराक्षरैः संस्कृतभाषायां व्याख्यायन्ताम् । 10×5=50

5.(a) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

5.(b) अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।।

5.(c) अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।

5.(d) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।।

5.(e) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ।।

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायां कार्या । 17+17+16=50

6.(a) ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ।।

6.(b) नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।।

6.(c) सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ।
तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम् ।।

7. अधोलिखितानामाशयं ससन्दर्भं प्रतिपाद्यताम् । 17+17+16=50

7.(a) आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ।।

7.(b) विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

7.(c) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरुप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः । विशेषेण राज्ञाम् । विरला हि तेषामुपदेष्टारः ।

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या । 17+17+16=50

8.(a) कातरा येप्यशक्ता वा नोत्साहस्तेषु जायते ।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ।।

8.(b) भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यासि पदं पुनराश्रमेऽस्मिन् ।।

8.(c) अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ।।

CS (Main) Exam : ,2014

**C–DRN–N–L–UBOB**

# SANSKRIT

## Paper—II

## (Literature)

*Time Allowed : Three Hours*

*Maximum Marks : 250*

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **Two Sections.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** from each section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly.

---

## SECTION—A

Q.1. **अधोनिर्दिष्टानां विषयाणां सोदाहरणं पर्यालोचनं क्रियताम् (150 शब्दपरिमितं) :** **10×5=50**

Q. 1(a) रघुवंशीयानां राज्ञां के के गुणाः स्पृहणीयाः प्रतिभान्ति। 10

Q. 1(b) किरातार्जुनीये निरूपिता राजनीतिः। 10

Q. 1(c) शिवराज्योदये घटनासंयोजनम्। 10

Q. 1(d) कादम्बर्याः कथायाः कानि मनोहराणि तत्वानि सन्ति। 10

Q. 1(e) दशकुमारचरिते वर्णितं सामाजिकजीवनस्य वैचित्र्यम्। 10

Q.2. **अधोनिर्दिष्टानां विषयाणां समीक्षा करणीया :**

Q. 2(a) ईशावास्योपनिषदः शान्तिपाठः। 20

Q. 2(b) अर्जुनविषादस्यापनोदनाय आत्मस्वरूपबोधस्यावश्यकता। 15

Q. 2(c) सुन्दरे किं न सुन्दरम्। 15

Q.3. **अधस्तात् निर्दिष्टानां विषयाणां सारगर्भिता समीक्षा कार्या :**

Q. 3(a) उदयनजीवने प्रियजनः कदाचित् कथंचित् विलुप्यते, किन्तु प्रेमराशिः न विलुप्यते। 20

Q. 3(b) उत्तररामचरिते भवभूतिनाविष्कृतः करुण रसः। 20

Q. 3(c) अभिज्ञानशाकुन्तले दुर्वाससः शापस्य प्रयोजनम्। 10

Q.4. **अधोनिर्दिष्टानां विषयाणां नागराक्षरैः संस्कृतभाषायां विवेचनं विधीयताम् :**

Q. 4(a) हर्षचरिते समुपलभ्यमाना भारतवर्षीया संस्कृतिः, इतिहासश्च। 20

Q. 4(b) मेघदूते विरहिणः यक्षस्यातृप्तः कामः सर्वत्र विलसति। 15

Q. 4(c) नीतिशतके वर्णितः सज्जनदुर्जनयोः भेदः। 15

## SECTION—B

Q.5. **अधोलिखितानां पद्यानां व्याख्या संस्कृतभाषायामेव नागराक्षरैरेव कर्तव्या (150 शब्दपरिमितं) :**

**10×5=50**

Q. 5(a) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभाद् उद्बाहुरिव वामनः।। 10

Q. 5(b) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।। 10

Q. 5(c) पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वाऽपि हतद्विपानाम्।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः।। 10

Q. 5(d) वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्याम् अतैलपूराः सुरतप्रदीपाः।। 10

Q. 5(e) निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम्।। 10

Q.6. **अधोनिर्दिष्टानां पद्यानां व्याख्या संस्कृतभाषायामेव नागराक्षरैरेव विधेया :**

Q. 6(a) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।। 20

Q. 6(b) य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते।। 15

Q. 6(c) पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा।
सपङ्काम् अनलंकारां विपद्मामिव पद्मिनीम्।। 15

Q.7. **अधोलिखितानां तात्पर्यार्थं ससन्दर्भं प्रतिपाद्यताम् :**

Q. 7(a) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलव-दुर्विदग्धं ब्रह्मापि नरं न रञ्जयति।। 20

Q. 7(b) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनककवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।। 15

Q. 7(c) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि खड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटात् मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्य्यम् इत्येतानि सहपासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वेवोद्गता।। 15

Q.8. **अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या :**

Q. 8(a) किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।। 20

Q. 8(b) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।। 15

Q. 8(c) म्लानस्य जीवकुसुमस्य विकासनानि
संतर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि।। 15

वियोज्य *DETACHABLE*

0000232

# SANSKRIT

## Paper II
## (LITERATURE)

CS (Main) Exam, 2015

| *Time Allowed : Three Hours* | *Maximum Marks : 250* |
|---|---|

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

There are **EIGHT** questions divided in **Two Sections.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining **THREE** are to be attempted choosing at least **ONE** from each section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## SECTION 'A'

| | | |
|---|---|---|
| 1. | अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं विधीयताम् (150 शब्दपरिमितम्) : | 10×5=50 |
| 1.(a) | कुमारसम्भवं कालिदासस्य कलायाः सुन्दरसृष्टिरस्ति । | 10 |
| 1.(b) | भगवद्गीतायां कर्मयोगमधिकृत्य एकां टिप्पणीं लिखत । | 10 |
| 1.(c) | नैषधीयचरितं कलापक्षपातिनां काव्यानां मुकुटमणिरस्ति । | 10 |
| 1.(d) | स्वप्नवासवदत्ते स्वप्नदृश्यस्य नाटकीयं महत्त्वं प्रतिपादयत । | 10 |
| 1.(e) | वर्णकरप्रणीत-'शिवराज्योदय'स्य शैलीसौन्दर्यं प्रपञ्चयत । | 10 |
| 2. | अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया । | 17+17+16=50 |
| 2.(a) | ईशावास्योपनिषदि प्रदिपादितं दर्शनम् । | 17 |
| 2.(b) | माघमहाकवेः शास्त्रवैदुष्यं सप्रमाणं प्रकाशयत । | 17 |
| 2.(c) | कौटिल्यस्य अर्थशास्त्रे अर्थनीतिः । | 16 |
| 3. | अधोनिर्दिष्टानां विषयाणां सारपरिपूर्णा समीक्षा कार्या । | 17+17+16=50 |
| 3.(a) | 'कादम्बरी अस्त्यतिद्वयी रचना' इति सप्रमाणं स्थापयत । | 17 |
| 3.(b) | अभिज्ञानशाकुन्तले कालिदासेनाविष्कृतं जीवनदर्शनम् । | 17 |
| 3.(c) | मृच्छकटिकं चरित्रचित्रणप्रधानेषु रूपकेष्वन्यतमम् । | 16 |
| 4. | अधस्तनेषु विषयेषु नागराक्षरैः संस्कृतभाषायामेव विवेचनं विधेयम् । | 17+17+16=50 |
| 4.(a) | मेघदूते प्रणयस्य विह्वलता विवशता विकलता च आत्मानं साकारेण रूपेण परिणमयन्ती संलक्ष्यते । | 17 |
| 4.(b) | ऐतिहासिककाव्येषु राजतरंगिण्याः वैशिष्ट्यम् । | 17 |
| 4.(c) | अमरुशतकस्य काव्यसौष्ठवम् । | 16 |

## SECTION 'B'

| | | |
|---|---|---|
| 5. | नागराक्षरैः संस्कृतभाषायां व्याख्यायन्ताम् (150 शब्दपरिमितम्) : | 10×5=50 |
| 5.(a) | क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।<br>तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ | 10 |

5.(b) यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ।। 10

5.(c) आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ।। 10

5.(d) न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ।। 10

5.(e) पीडितां दुःखसंतप्तां परिक्षीणां तपस्विनीम् ।
ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ।। 10

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायां कार्या । 17+17+16=50

6.(a) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।। 17

6.(b) न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।। 17

6.(c) क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ।। 16

7. अधोलिखितानामाशयं ससन्दर्भं प्रतिपादयत । 17+17+16=50

7.(a) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।। 17

7.(b) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः । अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः । 17

7.(c) शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।। 16

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या । 17+17+16=50

8.(a) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ।। 17

8.(b) विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ।। 17

8.(c) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।। 16

---

CS (MAIN) Exam:2016

**M–ESC–D–SKT**

# SANSKRIT

## PAPER—II

## ( LITERATURE )

Time Allowed : Three Hours

Maximum Marks : 250

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in two Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answers written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

---

# संस्कृतम्

## द्वितीयं प्रश्नपत्रम्

## ( साहित्यम् )

समयः होरात्रयम् (घंटा-त्रयम्)

पूर्णाङ्काः 250

**प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

खण्डद्वयेषु विभाजिताः अष्ट-प्रश्नाः।

परीक्षार्थिभिः पञ्चैव प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्यौ। शेषप्रश्नेषु त्रयाणां समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् एकमवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **4**, **5** तथा **6** संस्कृतभाषयैव समाधेयाः। शेषप्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा परीक्षाप्रवेश-प्रमाण-पत्रेण स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्यामेव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंश वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। नचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

## खण्ड—A / SECTION—A

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं (*150* शब्दपरिमितम्) विधीयताम्— 10×5=50

(a) ''माघे सन्ति त्रयो गुणाः'' **शिशुपालवधमहाकाव्यमवलम्ब्य** सोदाहरणं प्रतिपादयत।

(b) **कादम्बरी** संस्कृतकाव्यसौन्दर्यस्य चरमोत्कर्षः? समीक्ष्यताम्।

(c) **किरातार्जुनीयमहाकाव्यस्य** प्रथमसर्गस्य किं वैशिष्ट्यम्?

(d) ऐतिहासिक-काव्य-दृष्ट्या **शिवराज्योदयस्य** पर्यालोचनं विधत्त।

(e) ''उपमा कालिदासस्य'' संसाध्यतां **रघुवंशमहाकाव्यमधिकृत्य।**

**2.** अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत— 17+17+16=50

(a) **भगवद्गीतायाः** महत्त्वं कीदृशम्? अधुना अस्या उपयोगिता अस्ति न वा?

(b) उपनिषद्साहित्ये **ईशावास्योपनिषदः** महत्त्वं लिखत।

(c) वाल्मीकि-**रामायणे** सुन्दरकाण्डस्य किं वैशिष्ट्यम्?

**3.** अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया— 17+17+16=50

(a) ''नाट्यशिल्पदृष्ट्या **अभिज्ञानशाकुन्तलस्य** पञ्चमोऽङ्कः चतुर्थाङ्कापेक्षया प्रशस्ततरः।'' अस्मिन् विषये स्वीयम् अभिमतं प्रकाशयत।

(b) **मुद्राराक्षसनाटकस्य** को नायकः? सयुक्तिकं प्रतिपाद्यताम्।

(c) **महाभारतकथामाश्रित्य** रचितेषु रूपकेषु **वेणीसंहारं** प्रकृष्टतमम्। सोदाहरणं समीक्ष्यताम्।

**4.** अधोलिखितान् विषयानधिकृत्य संक्षिप्तोत्तरं लघुटिप्पणी वा नागराक्षरैः संस्कृतभाषायामेव लिखत— 13+13+12+12=50

(a) **पूर्वमेघः** प्राकृतिकसौन्दर्यस्य सुन्दरं निदर्शनम् **उत्तरमेघश्च** सुकुमारभावानां विमलमुदाहरणम्। समीक्ष्यताम्।

(b) ''**गीतगोविन्दे** जयदेवेन मधुरकोमलकान्तपदावल्या भक्तिरेव साधिता।'' अस्य कथनस्य समीक्षां विधाय गीतगोविन्दस्य भक्तिः शृङ्गाररसप्रधाना भावध्वनिः प्रधाना वा इत्यपि विमृशत।

(c) कल्हणस्य **राजतरङ्गिण्याः** ऐतिहासिकं महत्त्वं लिखत।

(d) **नीतिशतके** प्रतिबिम्बितः भर्तृहरेः अनुभवसंसारः।

## खण्ड—B / SECTION—B

5. नागराक्षरैः संस्कृतभाषायां व्याख्यायन्ताम् (*150* शब्दपरिमितम्)— 10×5=50

(a) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(b) यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम्॥

(c) यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्॥

(d) मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥

(e) उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम्॥

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायामेव विधेया— 17+17+16=50

(a) कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्॥

(b) अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥

(c) नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥

7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः — 17+17+16=50

(a) धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥

(b) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। तथाहि। इयं संवर्धनवारिधारा तृष्णाविषवल्लीनाम्, व्याधगीतिरिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरितचित्राणाम्, संगीतशाला भ्रूविकारनाट्यानाम्, प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणः, वध्यशाला साधुभावस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य।

(c) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलव-दुर्विदग्धं ब्रह्मापि नरं न रञ्जयति॥

8. प्रसंगनिर्देशपूर्वकं व्याख्या कार्या— 17+17+16=50

(a) अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः
त्वय्यस्यां कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥

(b) इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥

(c) स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम्॥

★★★

STH-D-SNKT

# संस्कृतम् / SANSKRIT

## द्वितीयं प्रश्नपत्रम् / Paper II

## साहित्यम् / Literature

| समयः : होरात्रयम् (घण्टा–त्रयम्)<br>Time Allowed : Three Hours | पूर्णाङ्काः : 250<br>Maximum Marks : 250 |
| --- | --- |

## प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः

***कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः***

*__खण्डद्वयेषु__ विभाजिताः अष्ट-प्रश्नाः ।*

*परीक्षार्थिभिः __पञ्चैव__ प्रश्नाः समाधेयाः ।*

*प्रश्नसंख्या __1__ तथा __5__ अनिवार्यतया समाधेया । शेषप्रश्नेषु __त्रयाणां__ समाधानं प्रदेयम् । तत्र प्रत्येकखण्डात् __एकमवश्यं__ करणीयम् ।*

*सर्वत्र प्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।*

*प्रश्नसंख्या __4, 5__ तथा __6__ __संस्कृतभाषयैव__ समाधेयाः । शेषप्रश्नानां समाधानं यथेच्छं __संस्कृतभाषया__ अथवा परीक्षाप्रवेश-प्रमाण-पत्रेण स्वीकृत-भाषया करणीयम् । __संस्कृतभाषा__ देवनागरी-लिप्यामेव लेखनीया ।*

*प्रश्नोत्तरस्य पदसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।*

*यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया ।*

*प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।*

## Question Paper Specific Instructions

***Please read each of the following instructions carefully before attempting questions :***

*There are __EIGHT__ questions divided in __TWO SECTIONS__.*

*Candidate has to attempt __FIVE__ questions in all.*

*Questions no. __1__ and __5__ are compulsory and out of the remaining, any __THREE__ are to be attempted choosing at least __ONE__ from each section.*

*The number of marks carried by a question / part is indicated against it.*

*Questions no. __4, 5__ and __6__ must be answered in __SANSKRIT__ and the remaining questions must be answered either in __SANSKRIT__ or in the medium authorized in the Admission Certificate. Answers written in __SANSKRIT__ must be in Devanagari script.*

*Word limit in questions, wherever specified, should be adhered to.*

*Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.*

*Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.*

## SECTION A

**Q1. अधोनिर्दिष्टानां विषयाणां सोदाहरणं पर्यालोचनं शतपञ्चाशत् (150) पदपरिमितं विधीयताम् ।** ***10×5=50***

(a) *रघुवंश*-महाकाव्यमवलम्ब्य 'क इह रघुकारे न रमते ?'—इति मतस्य याथार्थ्यं सयुक्तिकं सोदाहरणं च प्रतिपाद्यताम् । *10*

(b) 'नारिकेलफलसंमितं वचो भारवे:'—मतमिदं सयुक्तिकं सोदाहरणं च समीक्ष्यताम् । *10*

(c) 'कादम्बरी-रसज्ञानामाहारोऽपि न रोचते'—अस्याशय: स्पष्टीकरणीय: । *10*

(d) वर्णेकर-प्रणीते महाकाव्ये शिवराज्योदय उपपादनीय: । *10*

(e) *दशकुमारचरितं* विषयीकृत्य 'दण्डिन: पदलालित्यं' प्रमाणीक्रियताम् । *10*

**Q2. अधोनिर्दिष्टानां विषयाणां सारगर्भिता समीक्षा करणीया ।** ***15+15+20=50***

(a) *ईशोपनिषदि* प्रतिपादितं ब्रह्मस्वरूपं निरूपणीयम् । *15*

(b) *श्रीमद्-भगवद्गीता*यां प्राप्तो ज्ञानकर्मसमुच्चयो निर्वर्ण्यताम् । *15*

(c) *कौटिलीयार्थशास्त्र*स्य महत्त्वं तथास्य सांप्रतिकम् उपयोगित्वं च वि व्रियताम् । *20*

**Q3. अधस्तात् प्रदत्तानां विषयाणां समीक्षा सम्यग् विधेया ।** ***15+15+20=50***

(a) 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्; तत्रापि च चतुर्थोऽङ्क:'— सर्वथा सयुक्तिकं विशद्यतामस्याशय: । *15*

(b) 'शूद्रककृतं *मृच्छकटिक*-प्रकरणं लोकचरित्राणां वास्तव-जीवनस्य च सार्थकं नाट्यरूपम्'— सम्यग् विचार्यताम् । *15*

(c) भासकृतं हर्षदेवकृतं च उदयनकथाविषयकं नाट्यकर्मद्वयं नाट्यकलाया उत्कर्षविचारेण समीक्षणीयम् । *20*

**Q4. अधस्तनानां विषयाणां संस्कृतभाषया देवनागराक्षरैश्च संक्षेपेण विवेचनं कर्तव्यम् ।** ***15+20+15=50***

(a) विप्रलम्भशृङ्गार-वर्णने *मेघदूत*स्य आदर्शरूपता यक्षस्य मनोलोकस्य च आलेख्यम् अपूर्वम् । *15*

(b) 'विष्णुशर्म-कृते *पञ्चतन्त्रे* राजनीति: लोकप्रज्ञा च विषयीकृते ।'— विस्पष्टीक्रियताम् । *20*

(c) इतिहास-समीक्षया काव्यविचारेण च *हर्षचरित*स्य विशिष्टता प्रतिपादनीया । *15*

## SECTION B

**Q5. नागराक्षरैः संस्कृतभाषया च 150-पदपरिमाणेन व्याख्यायन्ताम् एते श्लोकाः ।** ***10×5=50***

(a) अथ वा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।। *10*

(b) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।। *10*

(c) पीडितां दुःखसंतप्तां परिक्षीणां तपस्विनीम् ।
ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ।। *10*

(d) अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।। *10*

(e) पदं तुषारस्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तै-
र्मुक्ताफलैः केसरिणां किराताः ।। *10*

**Q6. अधोलिखितानां व्याख्या संस्कृतभाषया नागराक्षरैश्च विधेया ।** ***17+17+16=50***

(a) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः सं शृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसंपदः ।। *17*

(b) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।। *17*

(c) देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्ति-र्धीरस्तत्र न मुह्यति ।। *16*

**Q7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः ।** ***17+17+16=50***

(a) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।। *17*

(b) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभः वचः ।। *17*

(c) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वमानुषशक्तित्वं चेति महतीयं खल्वर्थपरंपरा । सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः । यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । *16*

**Q8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्यानं कार्यम् ।** ***16+16+18=50***

(a) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनम्
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ।। *16*

(b) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ।। *16*

(c) यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किंचित्किंचिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।। *18*

**वियोज्य** ***DETACHABLE***

# संस्कृतम् (द्वितीयं प्रश्नपत्रम्)
## (साहित्यम्)

# SANSKRIT (Paper II)
## (LITERATURE)

| | |
|---|---|
| समयः : होरात्रयम् (घण्टा-त्रयम्)<br>Time Allowed : Three Hours | पूर्णाङ्काः : 250<br>Maximum Marks : 250 |

**प्रश्नपत्र-संबन्धिताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वयेषु** विभाजिताः **अष्ट-प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रश्नसंख्या **1** तथा **5** अनिवार्यतया समाधेया । शेषप्रश्नेषु त्रयाणां समाधानं प्रदेयम् । तत्र प्रत्येकखण्डात् एकमवश्यं करणीयम् ।

सर्वत्र प्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।

प्रश्नसंख्या **4, 5** तथा **6** **संस्कृतभाषयैव** समाधेयाः । शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा परीक्षाप्रवेश-प्रमाण-पत्रेण स्वीकृत-भाषया करणीयम् । **संस्कृतभाषा** देवनागरी-लिप्यामेव लेखनीया ।

प्रश्नोत्तरस्य पदसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा(×) विधेया ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Questions No. **1** and **5** are compulsory and out of the remaining; any **THREE** are to be attempted choosing at least **ONE** from each Section.

The number of marks carried by a question/part is indicated against it.

Questions No. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्ड 'A' SECTION 'A'

**1.** अधोनिर्दिष्टानां विषयाणामुदाहरणमुखेन पर्यालोचनं क्रियताम् । (150 शब्दपरिमितमेव) 10×5=50

**1.(a)** किरातार्जुनीये कथाया नावीन्यं यद्वा भाषाविनियोगस्य वैशिष्ट्यं परिलक्ष्यते । 10

**1.(b)** श्रीहर्षेण नैषधीयचरिते प्रदर्शितं वर्णनचातुर्यं सोदाहरणं लिखत । 10

**1.(c)** कुमारसम्भव-महाकाव्ये शिवपार्वत्योः श्रृङ्गारवर्णनस्य औचित्यं चिन्तयत । 10

**1.(d)** दशकुमारचरितात् कस्याप्येकस्य राजकुमारस्य प्रवासानुभववर्णनं क्रियताम् । 10

**1.(e)** शुकनासोपदेशस्य उपयोगिता आधुनिकसन्दर्भे समीक्ष्यताम् । 10

**2.** अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां लिखत । 15+15+20=50

**2.(a)** ''ईशावास्योपनिषदि वर्णिताः ये विचाराः सन्ति ते आधुनिक-जीवनयात्रायां मार्गदर्शकाः भवन्ति'' कथमिति स्पष्टीक्रियताम् । 15

**2.(b)** रामायणस्य सुन्दरकाण्डे वर्णितं हनुमतोऽद्भुतरसाप्लावितं दूतकर्म सोदाहरणं समीक्ष्यताम् । 15

**2.(c)** श्रीमद्भगवद्गीतायां श्रीकृष्णेन भगवता कथं कर्मयोगस्य भक्तियोगस्य च समन्वयः कृतः ? 20

**3.** अधोनिर्दिष्टानां नाट्यविषयक-प्रश्नानां समाधानं क्रियताम् । 15+15+20=50

**3.(a)** स्वप्नवासवदत्ते स्वप्नदृश्यस्य नाटकीयं तात्पर्यं महत्त्वं च सम्यक् प्रतिपाद्यताम् । 15

**3.(b)** 'उत्तरे रामचरिते प्रेमधर्मविरुद्धो राजधर्मः' इति वचनं कथं चरितार्थं भवति । 15

**3.(c)** अभिज्ञानशाकुन्तले प्रयुक्तानां भ्रमर-हरिणीत्यादीनां प्रतीकानां प्रयोजनं, सातत्यं सौन्दर्यञ्च निरूपयत । 20

**4.** अधस्तनानां विवेचनं संक्षेपेण संस्कृतभाषयैव देवनागरीलिप्यामेव च कर्तव्यम् । 15+15+20=50

**4.(a)** नीतिशतकाद् यथेच्छं त्रीणि सुभाषितानि चित्वा, तत्र तत्र निरूपिताः जीवनोपयोगिनो विचाराः विशदीक्रियताम् । 15

**4.(b)** 'कल्हणस्य राजतरङ्गिणी काव्यकौशलं प्रदर्शयन् काश्मीरस्य प्रामाणिकम् इतिहासमपि प्रस्तौति' इमामुक्तिं साधयत । 15

**4.(c)** अमरुशतकस्य काव्यकला निर्वर्ण्यताम् । 20

## खण्ड 'B' SECTION 'B'

5. नागराक्षरैः संस्कृतभाषया 150 पदपरिमाणेन व्याख्यायन्तामेते श्लोकाः । 10×5=50

5. (a) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ।। 10

5. (b) पदं तुषारस्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तै-
र्मुक्ताफलैः केसरिणां किराताः ।। 10

5. (c) मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ।। 10

5. (d) निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म-विद्विषाम् ।। 10

5. (e) तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद् वरं विरोधोऽपि समं महात्मभिः ।। 10

6. अधोलिखितानां व्याख्या संस्कृतभाषया नागराक्षरैश्च विधेया । 15+15+20=50

6. (a) तां कृशां दीनवदनां मलिनाम्बरवासिनीम् ।
भर्त्सयांचक्रिरे सीतां राक्षस्यस्तां समन्ततः ।। 15

6. (b) वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ।। 15

6. (c) अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम-उक्तिं विधेम ।। 20

7. अधोलिखितानाम् आशयः ससन्दर्भं प्रतिपादनीयः । 15+15+20=50

7. (a) संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थित-हरशिरश्चन्द्रिका-धौतहर्म्या ।। 15

7. (b) स्वल्पसत्त्वमुन्मत्तीकरोति । सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम् । गुणवन्तमपवित्रमिव न स्पृशति । उदारसत्त्वममङ्गलमिव न बहु मन्यते । सुजनमनिमित्तमिव न पश्यति । अभिजातमहिमिव लङ्घयति । शूरं कण्टकमिव परिहरति । दातारं दुःस्वप्नमिव न स्मरति । मनस्विनमुन्मत्तमिवोपहसति ।। 15

7. (c) लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।। 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्यानं क्रियताम् । 15+15+20=50

8. (a) इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ।। 15

8. (b) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत् स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ।। 15

8. (c) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।। 20

---

**वियोज्यम् DETACHABLE**

# संस्कृतम् (द्वितीयं प्रश्नपत्रम्)
# (साहित्यम्)

# SANSKRIT (Paper II)
# (LITERATURE)

*समयः : होरात्रयम् (घंटा-त्रयम्)*
*Time Allowed : Three Hours*

*पूर्णांकाः : 250*
*Maximum Marks : 250*

प्रश्नपत्र-संबन्धिताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः ।**

**खण्डद्वये** विभाजिताः **अष्टौ प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

**प्रथम-पञ्चमौ** प्रश्नौ अपरिहार्यौ । अवशिष्टेषु प्रश्नेषु **त्रयः प्रश्नाः** समाधेयाः । प्रतिखण्डम् **एकः प्रश्नः** अवश्यं ग्रहणीयः ।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः ।

**चतुर्थ-पञ्चम-षष्ठप्रश्नाः** संस्कृतभाषायां देवनागरीलिप्या समाधेयाः । अवशिष्टप्रश्नानामुत्तरं **संस्कृतभाषायां** देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम् ।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया ।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम् ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत् ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Questions No. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** from each Section.

The number of marks carried by a question/part is indicated against it.

Questions No. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्डः 'A' SECTION 'A'

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (150) शब्दैः विधीयताम् । 10×5=50

**1.(a)** 'कुमारसम्भवं कालिदासस्य कलायाः सुन्दरसृष्टिरस्ति'— इति सोदाहरणं प्रतिपादयत । 10

**1.(b)** शिशुपालवध-महाकाव्यमवलम्ब्य 'माघे सन्ति त्रयो गुणाः'— इति मतस्य याथार्थ्यं सयुक्तिकं सोदाहरणं च प्रतिपाद्यताम् । 10

**1.(c)** 'नैषधं विद्वदौषधम्'— मतमिदं सयुक्तिकं सोदाहरणं च समीक्ष्यताम् । 10

**1.(d)** दशकुमारचरितं तत्कालगामिनः समाजस्य जीवितमुद्बुद्धं प्रज्वलच्चित्रं प्रस्तवीति — समीक्ष्यताम् । 10

**1.(e)** ऐतिहासिककाव्यदृष्ट्या शिवराज्योदयकाव्यस्य महत्त्वं विवृणुत । 10

**2.** अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत — 15+15+20=50

**2.(a)** ईशोपनिषदि प्राप्तो ज्ञानकर्मसमन्वयो निरूप्यताम् । 15

**2.(b)** 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः' अस्याशयः स्पष्टीकरणीयः । 15

**2.(c)** वाल्मीकिरामायणे सुन्दरकाण्डस्य वैशिष्ट्यानि प्रतिपादयत । 20

**3.** अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया । 15+15+20=50

**3.(a)** 'शाकुन्तलचतुर्थोऽङ्कः सर्वोत्कृष्टइति प्रथा ।
न सर्वसंमता यस्मात् पञ्चमोऽस्ति ततोऽधिकः ।।'— सोदाहरणं समीक्ष्यताम् । 15

**3.(b)** 'मुद्राराक्षसे चरित्राणां चित्रणं ललितं नितान्तम्'— इत्यस्य वचनस्य याथार्थ्यं प्रतिपादयत । 15

**3.(c)** 'उत्तरे रामचरिते भवभूतिर्विशिष्यते'— इति समीक्ष्यताम् । 20

**4.** अधस्तनानां विवेचनं संक्षेपेण **संस्कृतभाषयैव** देवनागरीलिप्यामेव च कर्तव्यम् । 15+15+20=50

**4.(a)** 'मेघदूते वर्णिता बाह्यप्रकृतिः विरहप्रपीडितस्योत्कण्ठितहृदयस्य मार्मिकव्यथास्ति'— इति सोदाहरणं समीक्ष्यताम् । 15

**4.(b)** 'जयदेवप्रणीते गीतगोविन्दे मधुरकोमलकान्तपदावल्या भक्तिरेवसाधिता'— इति विशदं समालोचयत । 15

**4.(c)** बाणप्रणीतस्य हर्षचरितस्य ऐतिहासिकं महत्त्वं लिखत । 20

## खण्डः 'B'     SECTION 'B'

**5.** नागराक्षरैः **संस्कृतभाषायां** प्रत्येकं सार्धशतेन (150) शब्दैः व्याख्यायन्ताम् — 10×5=50

**5.(a)** वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ 10

**5.(b)** त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ 10

**5.(c)** अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपिजातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ 10

**5.(d)** कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो नहि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ 10

**5.(e)** क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥ 10

**6.** अधानिर्दिष्टानां व्याख्या नागराक्षरैः **संस्कृतभाषायामेव** विधेया — 15+20+15=50

**6.(a)** यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ 15

**6.(b)** न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ 20

**6.(c)** सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ।
तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम् ॥ 15

**7.** अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः । 15+15+20=50

**7.(a)** मन्द मन्द नुदात पवनश्चानुकूला यथा त्वा
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ 15

7. (b) स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ 15

7. (c) यैवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः । अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः । 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या । 15+15+20=50

8. (a) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ॥ 15

8. (b) उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ 15

8. (c) विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥ 20

---

CS (Main) Exam, 2020

वियोज्य DETACHABLE

# संस्कृतम् (द्वितीयं प्रश्नपत्रम्)
## (साहित्यम्)

# SANSKRIT (Paper II)
## (LITERATURE)

| | |
|---|---|
| *समयः : होरात्रयम् (घंटा-त्रयम्)*<br>*Time Allowed : Three Hours* | *पूर्णांकाः : 250*<br>*Maximum Marks : 250* |

## प्रश्नपत्र-संबन्धिताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः ।**

**खण्डद्वये** विभाजिताः **अष्टौ प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

**प्रथम-पञ्चमौ** प्रश्नौ अपरिहार्यौ । अवशिष्टेषु प्रश्नेषु **त्रयः प्रश्नाः** समाधेयाः । प्रतिखण्डम् **एकः प्रश्नः** अवश्यं ग्रहणीयः ।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः ।

**चतुर्थ-पञ्चम-षष्ठप्रश्नाः** संस्कृतभाषायां देवनागरीलिप्या समाधेयाः । अवशिष्टप्रश्नानामुत्तरं **संस्कृतभाषायां** देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम् ।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया ।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम् ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत् ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Questions No. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** from each Section.

The number of marks carried by a question/part is indicated against it.

Questions No. **4**, **5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्डः 'A'  SECTION 'A'

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (150) शब्दैः विधीयताम् । $10\times5=50$

1.(a) रघुवंशमहाकाव्यस्य काव्यसौष्ठवं विशद्यताम् । 10

1.(b) 'भारवेरर्थगौरवम्' इत्येतन्मतं सयुक्तिकं सोदाहरणं परीक्ष्यताम् । 10

1.(c) 'नैषधे पदलालित्यम्' इत्येषा सूक्तिः युक्तिपुरस्सरं विवेचनीया । 10

1.(d) 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' इति वचसः आशयो विव्रियताम् । 10

1.(e) श्रीधरभास्करवर्णेकर-प्रणीतस्य शिवराज्योदयमहाकाव्यस्य वैशिष्ट्यं निरूप्यताम् । 10

2. अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत — 15+15+20=50

2.(a) ईशावास्योपनिषदि प्रतिपादितं विद्याविद्ययोः स्वरूपं विवेचनीयम् । 15

2.(b) कौटिलीयार्थशास्त्रस्य साम्प्रतिकम् उपादेयत्वं वर्ण्यताम् । 15

2.(c) गीतायां प्रतिपादितं निष्कामकर्मयोगं वर्णयत । 20

3. अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया । 15+15+20=50

3.(a) 'स्वप्नवासवदत्तम्'नाम्नि नाटके स्वप्नदृश्यस्य नाट्यदृशा महत्त्वं प्रतिपाद्यताम् । 15

3.(b) 'कारुण्यं भवभूतिरेव तनुते' इति वचः उत्तररामचरितप्रसंगे समीक्ष्यताम् । 15

3.(c) चरित्रचित्रणप्रधानेषु रूपकेषु मृच्छकटिकस्य वैशिष्ट्यं विशद्यताम् । 20

4. अधस्तनानां विवेचनं संक्षेपेण **संस्कृतभाषयैव** देवनागरीलिप्यामेव च कर्तव्यम् । 15+15+20=50

4.(a) 'पञ्चतन्त्रे राजनयः लोकनयश्च प्रतिपादितौ' इति मतं सयुक्तिकं समीक्ष्यताम् । 15

4.(b) अमरुकशतकस्य काव्यवैशिष्ट्यं विविच्यताम् । 15

4.(c) 'ऐतिहासिककाव्येषु राजतरंगिण्याः किमपि विशिष्टं स्थानम्' इत्येतद् वचः परीक्ष्यताम् । 20

## खण्डः 'B'      SECTION 'B'

5. नागराक्षरैः **संस्कृतभाषायां** प्रत्येकं सार्धशतेन (150) शब्दैः व्याख्यायताम् — 10×5=50

5. (a) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ 10

5. (b) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ 10

5. (c) न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ॥ 10

5. (d) द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ 10

5. (e) सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥ 10

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः **संस्कृतभाषायामेव** विधेया — 15+15+20=50

6. (a) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ 15

6. (b) प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ।
स्वगणेन मृगीं हीनां श्वगणेनावृतामिव ॥ 15

6. (c) वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ 20

7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः । 15+15+20=50

7. (a) तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ 15

7. (b) प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्
समुद्रमपि संतरेत् प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेन्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ 15

7.(c) अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरम् उपजनयति। 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 15+15+20=50

8.(a) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥ 15

8.(b) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥ 15

8.(c) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते॥ 20

---

CS (Main) Exam,2021



# संस्कृतम्

द्वितीयं प्रश्नपत्रम्

( साहित्यम् )

| समयः होरात्रयम् (घंटा-त्रयम्) | पूर्णाङ्काः 250 |
|---|---|

**प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वये** विभाजिताः **अष्टौ प्रश्नाः।**

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

**प्रथम-पञ्चमौ** प्रश्नौ अपरिहार्यौ। अवशिष्टेषु प्रश्नेषु **त्रयः** प्रश्नाः समाधेयाः। प्रतिखण्डम् **एकः** प्रश्नः अवश्यं ग्रहणीयः।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः।

**चतुर्थ-पञ्चम-षष्ठ**प्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः। अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम्।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम्।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत्।

# SANSKRIT

PAPER—II

( LITERATURE )

| Time Allowed : Three Hours | Maximum Marks : 250 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्ड—A / SECTION—A

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (*150*) शब्दैः विधीयताम्— 10×5=50

*(a)* ''उदात्त-सुकोमलकल्पनाकलितत्वात् कुमारसम्भवमाधुनिकरुचिं नितान्तं परिप्रीणाति'' इति सोदाहरणं प्रतिपादयत।

*(b)* ''नारिकेलफलसम्मितं वचो भारवेः''—इति मतस्य याथार्थ्यं सयुक्तिकं सोदाहरणं च प्रतिपाद्यताम्।

*(c)* ''उदिते नैषधे काव्ये क्व माघः क्व च भारविः''—मतमिदं सयुक्तिकं सोदाहरणं च समीक्ष्यताम्।

*(d)* ''दशकुमारचरितं साहित्यिकदृष्ट्या वस्तुत एका परमप्रशंसनीया रचनास्ति'' इति समीक्ष्यताम्।

*(e)* ''नवसर्गगते माघे नवशब्दो न विद्यते''—सूक्तिमेतां सयुक्तिकं सोदाहरणञ्च प्रतिपाद्यताम्।

**2.** अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत— 15+15+20=50

*(a)* ईशोपनिषदि प्रतिपादितं 'ब्रह्म'-स्वरूपं निरूप्यताम्।

*(b)* ''यन्मृच्छकटिकमुत्तमां कोटिं नयति तदस्ति तस्य कथावस्तु'' इति समीक्ष्यताम्।

*(c)* कथमिदं महर्षिवाल्मीकिप्रणीतं सुन्दरकाण्डं 'सुन्दर'मस्ति? इति विशदं समालोचयत।

**3.** अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया— 15+15+20=50

*(a)* ''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला''—इत्येषा सूक्तिः युक्तिपुरस्सरं विवेचनीया।

*(b)* ''भारतामृतसर्वस्वं गीता''—अस्याशयः स्पष्टीकरणीयः।

*(c)* ''नीतिशतके प्रतिबिम्बितः भर्तृहरेः अनुभवसंसारः'' इति सोदाहरणं प्रतिपादयत।

**4.** अधस्तनानां विवेचनं संक्षेपेण **संस्कृतभाषयैव** देवनागरीलिप्यामेव च कर्तव्यम्— 15+15+20=50

*(a)* ''मेघदूतं प्रकृतेरनुपमा रङ्गशालेव भाति''—इति सोदाहरणं समीक्ष्यताम्।

*(b)* ''स्पष्टभावरसा चित्रैः पदन्यासैः प्रवर्तिता।
नाटकेषु नटस्त्रीव भारती भवभूतिना॥''

सोदाहरणं समीक्ष्यताम्।

*(c)* ''अमरुककवेरेकः श्लोकः प्रबन्धशतायते'' इति सयुक्तिकं सोदाहरणं च समीक्ष्यताम्।

## खण्ड—B / SECTION—B

**5.** नागराक्षरैः **संस्कृतभाषायां** प्रत्येकं सार्धशतेन (*150*) शब्दैः व्याख्यायताम्— 10×5=50

*(a)* वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

*(b)* मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

*(c)* अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य,
स्थितः पृथिव्या इव मानदण्डः॥

*(d)* स किंसखा साधु न शास्ति योऽधिपं,
हितान्न यः संश्रृणुते स किम्प्रभु।
सदानुकूलेषु हि कुर्वते रतिं,
नृपेष्वमात्येषु च सर्वसम्पदः॥

*(e)* तथापि जिह्मः स भवज्जिगीषया,
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्,
वरं विरोधोऽपि समं महात्मभिः॥

**6.** अधोनिर्दिष्टानां व्याख्या नागराक्षरैः **संस्कृतभाषायामेव** विधेया— 15+20+15=50

*(a)* कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरः॥

*(b)* नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥

*(c)* अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति॥

**7.** अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः — 15+15+20=50

*(a)* धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

*(b)* मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।
पिनद्धां धूमजालेन शिखामिव विभावसोः।।

*(c)* गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः।

**8.** अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या— 15+15+20=50

*(a)* किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।।

*(b)* अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।

*(c)* म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि।।

★ ★ ★

CIVIL SERVICES (MAIN) EXAM-2022

CRNA-S-SNKT

# संस्कृतम् / SANSKRIT

## द्वितीयं प्रश्नपत्रम् / Paper II

CIVIL SERVICES (MAIN) EXAM-2022

## साहित्यम् / LITERATURE

| | |
|---|---|
| समयः : **होरात्रयम्** (घण्टा-त्रयम्)<br>*Time Allowed* : ***Three*** *Hours* | पूर्णाङ्काः : **250**<br>*Maximum Marks* : ***250*** |

---

### प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः

***कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः***

***खण्डद्वये*** *विभाजिताः* ***अष्टौ*** *प्रश्नाः ।*

*परीक्षार्थिभिः* ***पञ्चैव*** *प्रश्नाः समाधेयाः ।*

***प्रथम-पञ्चमौ*** *प्रश्नौ अपरिहार्यौ । अवशिष्टेषु प्रश्नेषु* ***त्रयः*** *प्रश्नाः समाधेयाः । प्रतिखण्डम्* ***एकः*** *प्रश्नः अवश्यं ग्रहणीयः ।*

*प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः ।*

***चतुर्थ-पञ्चम-षष्ठ****प्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः । अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम् ।*

*प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया ।*

*यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिंह (×) विधेयम् ।*

*प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत् ।*

### Question Paper Specific Instructions

***Please read each of the following instructions carefully before attempting questions :***

*There are* ***EIGHT*** *questions divided in* ***TWO SECTIONS.***

*Candidate has to attempt* ***FIVE*** *questions in all.*

*Questions No.* ***1*** *and* ***5*** *are compulsory and out of the remaining,* ***THREE*** *are to be attempted choosing at least* ***ONE*** *question from each section.*

*The number of marks carried by a question / part is indicated against it.*

*Questions No.* ***4, 5*** *and* ***6*** *must be answered in* ***SANSKRIT*** *and the remaining questions must be answered either in* ***SANSKRIT*** *or in the medium authorized in the Admission Certificate. Answers written in* ***SANSKRIT*** *must be in Devanagari script.*

*Word limit in questions, wherever specified, should be adhered to.*

*Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.*

*Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.*

---

## SECTION A

**Q1.** **अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (150) शब्दैः विधीयताम् :** ***10×5=50***

(a) "तावद् भा भारवेर्भाति यावन् माघस्य नोदयः" — इति मतस्य याथार्थ्यं सयुक्तिकं सोदाहरणं च प्रतिपाद्यताम् । *10*

(b) "नैषधं विद्वदौषधम्" — मतमिदं सयुक्तिकं सोदाहरणं च समीक्ष्यताम् । *10*

(c) "हृदयवसतिः पञ्चवाणस्तु बाणः" — इत्येतन्मतं सयुक्तिकं सोदाहरणं विशद्यताम् । *10*

(d) "क इह रघुकारे न रमते" — इति वचसः आशयो सोदाहरणं विव्रियताम् । *10*

(e) "दण्डिनः पदलालित्यम्" — इति मतस्य सार्थक्यं दण्डिविरचितग्रन्थदृष्ट्या निरूप्यताम् । *10*

**Q2.** **अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत :** ***15+15+20=50***

(a) गीतायां प्रतिपादितं भक्तियोगं सविस्तरं वर्णयत । *15*

(b) कौटिलीयार्थशास्त्रस्य वर्तमानकालिकम् उपयोगित्वम् अस्ति न वेति सयुक्तिकं समीक्ष्यताम् । *15*

(c) ईशोपनिषदि प्रतिपादितः ज्ञानकर्मसमन्वयो निरूप्यताम् । *20*

**Q3.** **अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया :** ***15+15+20=50***

(a) मृच्छकटिकप्रकरणे वर्णितं समाजचित्रं सविस्तरं सोदाहरणं प्रतिपाद्यताम् । *15*

(b) "स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः" — इत्युक्तिं सयुक्तिकं विशदयत । *15*

(c) अभिज्ञानशकुन्तलनाटकस्य चतुर्थाङ्कस्य विशेषत्वम् उपादेयत्वं च सविस्तरं प्रतिपादयत । *20*

**Q4.** **अधस्तनानां विवेचनं संक्षेपेण संस्कृतभाषयैव देवनागरीलिप्यामेव च कर्तव्यम् :** ***15+15+20=50***

(a) मेघदूतस्य पूर्वमेघे मेघस्य गमनमार्ग-वर्णनावसरे बाह्यप्रकृत्याः सौन्दर्यजातं यथा चित्रितं तत् सोदाहरणं सविस्तरं प्रकाशयत । *15*

(b) "जयदेवप्रणीते गीतगोविन्दे मधुरकोमलकान्तपदावल्या भक्तिरेव साधिता" — इति वचनं सयुक्तिकं समालोचयत । *15*

(c) पञ्चतन्त्रस्य परिचयं प्रदाय संस्कृतकथासाहित्य-जगति तस्य अवस्थानम् उपादेयत्वं च वर्णयत । *20*

## SECTION B

**Q5. नागराक्षरैः संस्कृतभाषया प्रत्येकं सार्धशतेन (150) शब्दैः व्याख्यायताम् :** *10×5=50*

(a) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।। *10*

(b) अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।। *10*

(c) यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ।। *10*

(d) निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ।। *10*

(e) विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दूरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ।। *10*

**Q6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायामेव विधेया :** *15+15+20=50*

(a) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।। *15*

(b) उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ।। *15*

(c) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ।। *20*

**Q7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः :** *15+15+20=50*

(a) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।। *15*

(b) बोद्धारो मत्सरग्रस्ता: प्रभव: स्मयदूषिता: ।

अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ।। 15

(c) आत्मविडम्बनाञ्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति, मनसा देवताध्यारोपणप्रतारणासम्भूतसम्भावनोपहताश्चान्त: प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति । 20

**Q8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या :** *15+15+20=50*

(a) क: कं शक्तो रक्षितुं मृत्युकाले

रज्जुच्छेदे के घटं धारयन्ति ?

इत्थं लोकस्तुल्यधमी वनानां

काले काले छिद्यते रुह्यते च ।। 15

(b) अर्थो हि कन्या परकीय एव ।

तामद्य संप्रेष्य परिग्रहीतु: ।

जातो ममायं विशद: प्रकामं

प्रत्यर्पितन्यास इवान्तरात्मा ।। 15

(c) शैशवात् प्रभृति पोषितां प्रियां

सौहृदादपृथगाश्रयामिमाम् ।

छद्मना परिददामि मृत्यवे

सौनिके गृहशकुन्तिकामिव ।। 20

**SKYC–B–SNKT**

# संस्कृतम्

द्वितीयं प्रश्नपत्रम्

( साहित्यम् )

| समयः होरात्रयम् (घंटा-त्रयम्) | पूर्णाङ्काः 250 |
|---|---|

**प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वये** विभाजिताः **अष्टौ** प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

**प्रथम-पञ्चमौ** प्रश्नौ अपरिहार्यौ। अवशिष्टेषु प्रश्नेषु **त्रयः** प्रश्नाः समाधेयाः। प्रतिखण्डम् **एकः** प्रश्नः अवश्यं ग्रहणीयः।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः।

**चतुर्थ-पञ्चम-षष्ठप्रश्नाः** संस्कृतभाषायां देवनागरीलिप्या समाधेयाः। अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम्।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम्।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत्।

# SANSKRIT

PAPER—II

( LITERATURE )

| Time Allowed : Three Hours | Maximum Marks : 250 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्ड—A / SECTION—A

**1.** अधोनिर्दिष्टानां विषयाणां विवेचनं सोदाहरणं प्रत्येकं सार्धशतशब्दैः (*150*) विधीयताम्— 10×5=50

*(a)* ''प्रकृतिमधुरा भारविगिरः'' इति वचसः आशयः सोदाहरणं विव्रियताम्।

*(b)* ''मेघे माघे गतं वयः'' इति कथनं सप्रमाणं निरूप्यताम्।

*(c)* ''बाणोच्छिष्टं जगत् सर्वम्'' इति वचनं सोदाहरणं समीक्ष्यताम्।

*(d)* बृहत्त्रयां नैषधीयचरितस्य स्थानं महत्त्वञ्च प्रतिपाद्यताम्।

*(e)* दण्डिनः गद्यसौन्दर्यं सोदाहरणं विशदीक्रियताम्।

**2.** अधोनिर्दिष्टानां विषयाणां युक्तियुक्ता समीक्षा विधेया—

*(a)* ईशा वास्योपनिषदि 'संभूति', 'असंभूति' इत्येतयोः कः अभिप्रायः, वैशद्येन समालोच्यताम्। 15

*(b)* गीतायां प्रतिपादितानां ज्ञान-कर्म-भक्तियोगानां सोदाहरणं स्वरूपं समीक्ष्यताम्। 20

*(c)* साम्प्रतिके प्रशासन-परिचालने कौटिलीयार्थशास्त्रस्य उपादेयत्वं सयुक्तिकं सोदाहरणं प्रतिपादयत। 15

**3.** अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया—

*(a)* ''कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्'' इति कथनं सोदाहरणं प्रमाणीक्रियताम्। 15

*(b)* मुद्राराक्षसनाटके वर्णितायाः राजनैतिकदशायाः चित्रणं समीक्षणञ्च क्रियताम्। 15

*(c)* ''उत्तररामचरिते भवभूतिर्विशिष्यते'' इति वचनं सप्रमाणं समीक्ष्यताम्। 20

**4.** अधोलिखितानां विवेचनं देवभाषयैव देवनागरीलिप्यामेव च कर्त्तव्यम्—

*(a)* पं० विष्णुशर्मविरचित-पञ्चतन्त्रस्य वैशिष्ट्यं प्रतिपाद्यताम्। 15

*(b)* संस्कृतमहाकाव्येषु कल्हणविरचित-राजतरंगिण्याः वर्ण्यविषयं वैशद्येन प्रतिपाद्यताम्। 15

*(c)* ''महाकवि जयदेवप्रणीतं गीतगोविन्दं पाठं-पाठं, श्रावं-श्रावं च कोऽपि अनिर्वचनीयः आनन्दः समुदेति'' इति भावं सोदाहरणं प्रमाणीक्रियताम्। 20

## खण्ड—B / SECTION—B

**5.** देवनागरीलिप्यां संस्कृतभाषायां सार्धशतशब्देषु (*150*) व्याख्यायताम्— 10×5=50

*(a)* त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥

*(b)* रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥

*(c)* अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥

*(d)* क्रियासु युक्तैर्नृप! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

*(e)* कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

**6.** अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायामेव विधेया—

*(a)* अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति॥ 15

*(b)* यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्त्वाय कल्पते॥ 15

*(c)* अश्रुपूर्णमुखीं दीनां कृशामनशनेन च।
शोकध्यानपरां दीनां नित्यं दुःखपरायणाम्॥ 20

**7.** अधोलिखितानां भावार्थः सन्दर्भपुरस्सरं प्रतिपादनीयः —

*(a)* सन्तप्तानां त्वमसि शरणं तत्पयोद! प्रियायाः,
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां,
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ 15

(b) यदाऽकिञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं,
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं,
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥ 15

(c) तात! चन्द्रापीड! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एवाऽभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। 20

**8.** अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या—

(a) सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः,
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्,
राज्यं परैरपहृतं कुशलं च देव्याः॥ 15

(b) यस्य त्वया व्रणविरोपणमिङ्गुदीनां,
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्द्धितको जहाति,
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ 15

(c) इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः,
किमस्या न प्रेयो? यदि परमसह्यस्तु विरहः॥ 20

★★★

# संस्कृतम्

द्वितीयं प्रश्नपत्रम्

( साहित्यम् )

समयः होरात्रयम् (घण्टा-त्रयम्) | पूर्णाङ्काः 250

**प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वये** विभाजिताः **अष्टौ** प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

**प्रथम-पञ्चमौ** प्रश्नौ अपरिहार्यौ। अवशिष्टेषु प्रश्नेषु **त्रयः** प्रश्नाः समाधेयाः। प्रतिखण्डम् **एकः** प्रश्नः अवश्यं ग्रहणीयः।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः।

**चतुर्थ-पञ्चम-षष्ठ**प्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः। अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम्।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम्।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत्।

# SANSKRIT

PAPER—II

( LITERATURE )

Time Allowed : Three Hours | Maximum Marks : 250

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्ड—A / SECTION—A

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (*150*) शब्दैः विधीयताम्—

Each answer along with examples of the following questions to be written within *150* words :

*(a)* कालिदासरचितरघुवंशमहाकाव्ये प्रतिबिम्बितं काव्यसौष्ठवं विशदयत।

Elaborate the poetical beauty as reflected in the epic, *Raghuvaṃśa* of Kālidāsa. 10

*(b)* ''भारवेरर्थगौरवम्'' इत्येतन्मतं युक्तिपुरस्सरं विशदयत।

Critically appreciate the statement—''भारवेरर्थगौरवम्''. 10

*(c)* ''कादम्बरीरसज्ञानामाहारोऽपि न रोचते'' इत्येषा भणितिः सयुक्तिकं सोदाहरणं च विव्रियताम्।

Elucidate critically with apt illustration the dictum—''कादम्बरीरसज्ञानामाहारोऽपि न रोचते''. 10

*(d)* ''उदिते नैषधे काव्ये क्व माघः क्व च भारविः'' इतीयम् उक्तिः सयुक्तिकं सोदाहरणं च समीक्ष्यताम्।

Examine critically with apt examples the saying—''उदिते नैषधे काव्ये क्व माघः क्व च भारविः''. 10

*(e)* श्रीधरभास्करवर्णेकरविरचितस्य शिवराज्योदयमहाकाव्यस्य काव्यगतं वैशिष्ट्यं प्रतिपादयत।

Describe the poetical features of the epic, 'शिवराज्योदयम्' composed by Shridhar Bhaskar Varnekar. 10

**2.** अधोनिर्दिष्टानां विषयाणां सारगर्भिता समीक्षणीया—

Enumerate the significance of the following questions :

*(a)* ईशावास्योपनिषदमनुसृत्य विद्याविद्ययोः स्वरूपं निरूप्यताम्।

Describe the distinct features of 'Vidyā' and 'Avidyā' as propagated in the *Īśāvāsyopaniṣad.* 15

*(b)* भगवद्गीतायां प्रतिपादितं 'कर्मयोगं' विशदयत।

Illustrate the 'Karmayoga' as described in the *Bhagavadgītā.* 20

*(c)* कौटिलीयायाः अर्थव्यवस्थायाः वर्त्तमानप्रसङ्गे उपयोगित्वं प्रतिपाद्यताम्।

Examine the utility at present day's administration of the State economic system as described by Kauṭilya in his *Arthaśāstra.* 15

**3.** अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया—

Analyze in detail the following questions :

*(a)* भाषादृष्ट्या मृच्छकटिकस्य वैशिष्ट्यं विशद्यताम्।

Enumerate the specialities found in the use of languages in the *Mṛcchakaṭikam.* 15

(b) रत्नावलीमनुसृत्य हर्षवर्धनस्य नाट्यशैली समीक्ष्यताम्।

Examine the features of style of composing drama of Harṣavardhana as traced in *Ratnāvalī*. 15

(c) वेणीसंहारमवलम्ब्य कर्णस्य चरित्रमनुशीलयत।

Draw the characteristic features of Karṇa as depicted in the drama, *Veṇīsaṃhāra*. 20

**4.** अधोलिखितानां विवेचनं देवभाषयैव देवनागरीलिप्यामेव च कर्त्तव्यम्—

The answers of the following questions must be written in Sanskrit language and in Devanāgarī script only :

(a) मेघदूते समुपलब्धं प्रकृतिचित्रणं वैशद्येन निरूप्यताम्।

Describe the features of the nature as depicted in the *Meghadūta*. 15

(b) संस्कृतसाहित्येतिहासे पञ्चतन्त्रस्य स्थानं विवेचयत।

Evaluate the position of the text, *Pañcatantra* in the history of Sanskrit literature. 15

(c) बाणभट्टरचितस्य हर्षचरितस्य ऐतिहासिकं महत्त्वं प्रतिपादयत।

Discuss the historical importance of the *Harṣacarita* of Bāṇabhaṭṭa. 20

## खण्ड—B / SECTION—B

**5.** नागराक्षरैः संस्कृतभाषायां प्रत्येकं सार्धशतेन (*150*) शब्दैः व्याख्यायताम्—

Explain each of the following verses in Sanskrit language and in Devanāgarī script only (within *150* words) :

(a) अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥ 10

(b) यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम्॥ 10

(c) आमेखलं सञ्चरतां घनानां छायामधःसानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः॥ 10

(d) द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥ 10

(e) कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्॥ 10

**6.** अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायामेव विधेया—

Explain the following verses in Sanskrit language and in Devanāgarī script only :

*(a)* तदेजति तन्नैजति तद् दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥ 15

*(b)* वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ 20

*(c)* मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।
पिनद्धां धूमजालेन शिखामिव विभावसोः॥ 15

**7.** अधोलिखितानामाशयः ससन्दर्भं प्रतिपादनीयः —

Elaborate the idea of the following verses with reference :

*(a)* त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः,
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्,
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥ 15

*(b)* अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति॥ 15

*(c)* तथा हि, अभिषेकसमय एव चैषां मङ्गलकलसजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्यधूमेनेव मलिनीक्रियते हृदयम्, पुरोहितकुशाग्रसम्मार्जनीभिरिवापनीयते क्षान्तिः, उष्णीषपट्टबन्धेनेवाच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापवार्यते परलोकदर्शनम्, चामरपवनैरिवापह्रियते सत्यवादिता, वेत्रदण्डैरिवोत्सार्यन्ते गुणाः, जयशब्दकलकलैरिव तिरस्क्रियन्ते साधुवादाः, ध्वजपटपल्लवैरिव परामृश्यते यशः। 20

**8.** अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या—

Explain the following verses with context :

*(a)* कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥ 15

*(b)* शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥ 15

*(c)* विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा,
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो,
विकारश्चैतन्यं भ्रमयति च संमीलयति च॥ 20

★★★